# संस्कृतम् / SANSKRIT

## ( अनिवार्य ) / ( Compulsory )

*समयः **होरात्रयम्** (घण्टा - त्रयम्)*
*Time Allowed : **Three** Hours*

*पूर्णाङ्काः : **300***
*Maximum Marks : **300***

---

**प्रश्नपत्रविषये विशेषनिर्देशाः**

***प्रश्नानां समाधानात् प्राक् सर्वेऽपि अधोलिखिताः निर्देशाः सावधानतया पठनीयाः***

*सर्वेऽपि प्रश्नाः समाधेयाः ।*

*प्रत्येकं प्रश्नस्य/प्रश्नभागस्य अङ्काः तत्पुरत एव निर्दिशः ।*

*यदि अन्यथा निर्देशो न भवेत् तर्हि प्रश्नानाम् उत्तराणि संस्कृतभाषया एव देवनागरीलिपिनिबद्धया लेखनीयानि ।*

*यद्यापि शब्दसीमा निर्धारिता तत्र सा अनुपालनीया एव । उत्तराणि चेत् सीमातः अधिकमान्या विस्तीर्णनि लघुत्तराणि वा भवेयुः तदा अङ्कहानिः भविष्यति ।*

*प्रश्नपत्रसहितोत्तरपुस्तिकायाः किमपि पृष्ठं पृष्ठांशो वा यदि रिक्तः त्यज्यते सः अवश्यं स्पष्टतया रेखाचिह्नेन निरसनीयः ।*

*प्रश्नक्रमानुसारेनेव क्रमेण प्रश्नोत्तराणि प्रदेवानि । नोचेत् अंशतः प्रदत्तं प्रश्नोत्तरमपि संपूर्णप्रश्नोत्तरवत् भवेत् ।*

## Question Paper Specific Instructions

***Please read each of the following instructions carefully before attempting questions :***

*All questions are to be attempted.*

*The number of marks carried by a question / part is indicated against it.*

*Answers must be written in **SANSKRIT** (Devanagari script) unless otherwise directed in the question.*

*Word limit in questions, wherever specified, should be adhered to and if answered in much longer or shorter than the prescribed length, marks may be deducted.*

*Any page or portion of the page left blank in the Question-cum-Answer Booklet must be clearly struck off.*

*Attempts of questions shall be counted in sequential order. Unless struck off, attempt of a question shall be counted even if attempted partly.*

---



munotes.in

**Q1.** **निम्नलिखितेषु विषयेषु कमप्येकं विषयमवलम्व्य षट्शतशब्दै (600 परिमितशब्दैः) निबन्धो लेखनीय :** ***100***

(a) उपभोक्तृगतजीवनशैली पर्यावरणञ्च

(b) चलभाषयन्त्रं प्रति आसक्तिः

(c) जालाधारितशिक्षायाः सीमाबद्धता

(d) आतङ्कवादः : समस्यैका

**Q2.** **अधोलिखितं गद्यांशं सावधानं पठित्वा तदनुसारम् अधः प्रदत्तानां प्रश्नानामुत्तराणि स्पष्टतया समासतश्च शुद्धगिरा दीयताम् :** ***12×5=60***

यदा एकः कृषकः क्षेत्रेषु कार्यं करोति स तदा शस्यानि तथा उत्पादनसामग्रीः उत्पादयति उद्योगसंस्थानां कृते । कर्पासमेव वस्त्ररूपाणि प्राप्नोति हस्तचालिततन्तुवाययन्त्रे तथा वैद्युतिकतन्तुवाययन्त्रे । वाहनानि उत्पादित्सामग्रीं स्थानात् स्थानान्तरं प्रापयन्ति । कस्मिन्नपि देशे एकस्मिन् वर्षे उत्पन्नवस्तूनां तथा प्रदत्तानां परिषेवानां साकल्यमूल्यं तावत् समूल-आवसथिक-उत्पन्न-सामग्रीति कथ्यते । अस्माभिः वैदेशिकवाणिज्यविषये विदेशे वस्तुप्रेषणेन मूल्यं प्राप्यते तथा विदेशाद् वस्तूनाम् आनयानेन मूल्यं प्रदीयते । वाणिज्यविषये वास्तविकः अर्थागमः कदाचिद् धनात्मकः कदाचिद् ऋणात्मकः कदाचिद् वा शून्यात्मकोऽपि भवति ।

समूलराष्ट्रिय-उत्पादने योगदानरताः सर्वाः क्रियाः वयम् आर्थिकक्रियारूपेण जानीमः । अस्यामार्थिकक्रियायाम् उच्चस्तरे अथवा निम्नस्तरे कुत्रापि वा ये जनाः कर्मरताः तिष्ठन्ति, ते श्रमिका इति ज्ञायन्ते । यद्यपि तेषु श्रमिकेषु केचन कदाचित् शारीरिकास्वस्थतावशाद् आकस्मिकशारीरिकाघातवशाद् वा प्राकृतिकदुर्योगापाताद् तथा सामाजिकधर्मीयपारिवारिकोत्सवेषु योगदानाद् इत्याकारवहुविधकारणसत्त्वाद् यदि स्वकीयकर्मस्थले अनुपस्थिता भवन्ति तथापि ते कर्मस्थले श्रमिकरूपेण तिष्ठन्ति कर्मच्युता न भवन्ति, तथा पुनः ये अधस्तनाः कर्मकराः प्रत्यक्षतः परोक्षतो वा ऊर्धतनानां कर्मकराणां कर्मसु सहायतां कुर्वन्ति तेऽपि श्रमिकरूपेण गण्यन्ते । यद्यपि वयं जानीमः यद् कर्मस्थले कर्मसम्पादनाद् ये जना नियोगकर्तुः सकाशाद् यथाकालं निर्धारितमर्थजातं प्राप्नुवन्ति त एव सामान्यतः श्रमिका इत्यभिधीयन्ते, किन्तु न केवलम् एतदेव अपि च ये जनाः स्वत एव स्वेच्छया कर्मसु प्रवृत्ता भवन्ति तेऽपि श्रमिका एव ।

भारते कर्मणां प्रकृतिर्बहुमुखिनी । केचन जना वर्षं व्याप्य कर्माणि प्राप्नुवन्ति, अपरे केचन मासकतिपयेषु एव कर्माणि कुर्वन्ति । अत्र अधिकांशाः श्रमिकाः तेषां प्रदत्तश्रमापेक्षया यथायथं वर्तनमेव न प्राप्नुवन्ति । इह ये जनाः अर्थनैतिककार्यसमूहे संलग्नाः सन्ति श्रमिकसंख्यागणनकाले ते यथाविधिनियुक्तवर्गे अन्तर्भुक्ता भवन्ति । विगते 2011-12 वर्षे भारते श्रमक्षमतायाः मानाङ्कनकाले श्रमिकसंख्या 473 लक्षमाने गणिता आसन् । यस्माद् भारतस्य अधिकांशजना ग्रामाञ्चले एव वसन्ति अतः ग्रामीणश्रमक्षमता आनुपातिकदृष्ट्या नगरश्रमक्षमतापेक्षया अधिकमेव । एतेषु 473 लक्षसंख्यकेषु 3/4 भागाः श्रमिका ग्रामीणा एवेति ।

भारते पुरुषा एव अधिकांशां श्रमक्षमतां प्रयोजयन्ति । यदपेक्षया नारीश्रमिकाः 1/3 भागां श्रमक्षमतां समायोजयन्ति । तत्रापि 20 शतांशसंख्यकाः नारीश्रमिकाः शहराञ्चले एव श्रमदानं कुर्वन्ति । एता नार्यः क्षेत्रेषु शस्यानां रोपणछेदने रन्धनकार्ये जलानयने समिधाहरणे व्यापृता दृश्यन्ते । किन्तु ता एतावत्कर्मविनिमयेनापि अर्थजातं शस्यजातं वा वर्तनरूपेण न प्राप्नुवन्ति । अपि च अधिकांशक्षेत्रे ता वर्तनमेव न प्राप्नुवन्ति । एतत्कारणाद् एता नारीकर्मकराः श्रमिकवर्गेऽपि न गण्यन्ते । अतो भारतस्य अर्थनीतिविदां मतं यद् एताः कर्मरताः नार्यः अपि श्रमिकरूपेण आशु गणनीया एव इति ।

(a) क एव श्रमिकः ? *12*

(b) का नाम समूल-आवसथिक-उत्पन्नसामग्री ? *12*

(c) भारतवर्षे कर्मनियोगपद्धतिः किंविधा ? *12*

(d) का नार्यः श्रमिकवर्गे अन्तर्भूता न भवन्ति ? *12*

(e) भारते जनसंख्यानुसारेण श्रमक्षमताया अनुपातः किंविधः ? *12*

**Q3. अधोवर्त्तिगद्यांशो संक्षेपो मूलभागस्य तृतीयांशपरिमितः स्वशब्दैः लेख्यः । शीर्षको न प्रदेयः ।** ***60***

'सभ्यता' 'संस्कृति'श्चेति शब्दद्वयं वर्तते ययोः प्रयोगस्तु भाषायां समधिकतरं भवति परं कमर्थविषेशमेतद् यथायथं अभिदधातीति बोधः भाषां प्रयुञ्जानेषु अल्पतमः प्रसरति । सः समयः मनसि कल्पयतां यदा अग्निदेवता मानवसमाजस्य असाक्षात्कृता अविदिता आसीत् । अद्य तु प्रतिगृहं चुल्लिका ज्वलति । यः इदम्प्रथमतया अग्निपदार्थमाविष्कृतवान् स नूनं कीदृक्महान्नाविष्कर्ता स्यात् ।

स वा समयो मनसि कल्प्यतां यदा सूचीतन्तू मानवस्याविदितौ आस्ताम् । यः अयोखण्डमेकं प्रथमतः सूच्याकारमकरोत् सोऽपि नूनं कीदृक्महान्नाविष्कर्ता स्यात् ।

एतदेवोदाहरणद्वयं विचारविषयं कुर्वन्तु । अत्र तत्त्वद्वयं वर्तते । तत्र प्रथमं तत्त्वमस्ति पुरुषविशेषनिष्ठा अग्न्याविष्करणशक्तिः, द्वितीयं च तत्र तत्त्वमस्ति अग्नेराविष्कारः । सूचीतन्तुविषयकं द्वितीये उदाहरणविशेषेऽपि तद्वदेवैकं तत्त्वमस्ति मानवनिष्ठा सूचीतन्त्वाविष्करणशक्तिः । अपरञ्च तत्र तत्त्वमस्ति सूचीतन्त्वाविष्कारः । यां योग्यतां यां प्रवृत्तिं यां वा प्रेरणां शक्तिमवलम्ब्य अग्ने सूचीतन्त्वोर्वा आविष्कारः फलितः सा भवति पुरुषविशेषस्य संस्कृतिः । अथ च सा संस्कृतिर्यत्तत्वविशेषमाविष्कृतवती स्वहिताय परहिताय च । तत् तत्त्वं भवति सभ्यतापदवाच्यम् ।

सुसंस्कृतः कोऽपि पुरुषः कमपि नूतनं पदार्थविशेषमाविष्करोति, परं तस्य सन्तत्या साऽविष्कृतिरनायासम् उपलब्धा तिष्ठति । यस्य बुद्धिर्यस्य विवेकः नूतनस्य कस्यचन तथ्यस्य दर्शनं करोति स एव किल वस्तुगत्या संस्कृतः पुरुषः । परन्तु तस्य सन्ततिर्या हि तद्दृष्टं वस्तु स्वपूर्वजाद् अनायासमेव स्वहस्तगतं कृतवती । स उत्तरपुरुषः स्वपूर्वज इव सभ्य स्यात् परं न सा 'संस्कृतः' इत्याभिधानभाग् भवति । आधुनिकमेकम् उदाहरणं दृश्यताम् । न्यूटनो गुरुत्वाकर्षणसिद्धान्तम् आविष्कृतवान् । सः संस्कृतः मानवः आसीत् । अद्यतनीय भौतिकविज्ञानस्य छात्रः न्यूटनस्य गुरुत्वाकर्षणसिद्धान्तं तु जानात्येव परं तेन सार्धं तस्य अनेक-नूतनतत्त्वानामपि तत्त्वानां ज्ञानं वर्तते यैर्न्यूटनोऽपरिचितः स्यात् । एतत्सत्त्वेऽपि वयं भौतिकविज्ञानस्य अद्यतनस्य छात्रं न्यूटनापेक्षया सभ्यतरम् इति अभिधातुं शक्नुमः परन्तु न्यूटन इव संस्कृतिमन्तं नेति ।

अग्नेराविष्काराय क्षुधैका प्रेरणा आसीदिति सम्भाव्यते । शीतोष्णाभ्यां त्राणं शरीरस्य च विभूषणमिति प्रवृत्तिद्वयं सूचीसूत्रयोराविष्काराय विशेषहेतुत्वेन परिलक्ष्यते । परञ्च तस्य जनस्य विषये कल्प्यतां यस्योदरं पूरितमस्ति, शरीरं वस्त्रैरावेष्टितमस्ति तथापि यदासौ अपरिछिन्नस्य आकाशस्य नीचैः शयानः निशायां द्योतमानानि तारकाणि पश्यति चेत् सः केवलमत एव निद्रां न लभते यतोहि स अनया जिज्ञासया व्याकुलः भवति यत्-वस्तुतः किमियं मौक्तिकपूर्णा स्थालीरिति । उदरपूर्तेः शरीराच्छानस्य आकांक्षा मानवीयसंस्कृतेः जनयित्री नास्ति । वस्तुतः पूर्णोदरोऽपि आच्छादिततनुरपि सुसंस्कृतः मानवः अनुद्योगी स्थातुं न शक्नोति । अस्माकं सभ्यतायाः महानंशः यद्यप्यस्माभिः

एतादृशेभ्यः संस्कृतेभ्यः जनेभ्य एव प्राप्तः । येषां चेतनायां मुख्यतः स्थूलभौतिककारणानां प्रभावः अवर्तत, किन्तु तस्याः चेतनायाः कश्चिद् अंशः अस्माभिः तादृशेभ्यः मनीषिभ्योऽपि प्राप्तः यैः स्वीयान्तःस्थया सहजया संस्कृत्या तथ्यविशेषाः प्राप्ताः न तु कयाचिद् भौतिकप्रेरणया । निशायां नक्षत्राणि प्रेक्ष्य शयने असमर्थः एतादृशः मनीषी एव अस्माकम् अद्यतनीयज्ञानस्य आद्यः पुरस्कर्ता आसीत् । *(344 शब्द)*

**Q4. अधोलिखितगद्यांशस्य आंग्लभाषया अनुवादः करणीयः –** ***20***

कालो हि अमूल्यः । वस्तुतः इत संसारे कालो एक एव हि वस्तु यत् सीमितमेव । यदि तव सम्पद्हानिर्भवति तर्हि भविष्यति त्वं तां पुनः अर्जयितुं सक्षमः, यदि तव गृहं ध्वस्तं भवति तर्हि त्वं पुनर्निमातुं शक्ष्यसि किन्तु तव कालस्य हानिर्भवति तर्हि स कालः त्वया पुनरुद्धर्तुं नैव शक्यते ।

यदि त्वं जीवने किमपि कर्तुं कोऽपि भवितुं किमपि प्राप्तुमिच्छसि तर्हि त्वया अनिवार्यतया कालस्य सदुपयोगः शिक्षणीयः । कालस्य सदुपयोगेनैव वयं अस्मद्विलसितविषये जातं लब्धुं समर्था भवामः ।

कथ्यते "कालो हि धनमिति" किन्तु वाक्यमिदं सम्पूर्णतया न सत्यम्, वस्तुतः कालो हि एकं सम्भावनीयं धनमेवेति । अस्य कालस्य सदुपयोगेन एव त्वं धनार्जनाय अलम् । अपरतः यदि त्वं कालस्य दुरुपयोगं करोति तर्हि तव धनार्जनस्य सम्भावनापि अपगमिष्यति । यदा त्वं कालस्य यथायथोपयोगे सदादत्तचितः तिष्ठसि तदा तव कालस्य अपचयोऽपि न भविष्यति । अतः त्वं कालस्य सदुपयोगकरणे सदुपायानाम् अन्वेषणे च उद्योगी भव । इतः परं त्वं स्वल्पकालमध्ये अधिकतरकर्मनिष्पादनस्य उपायान् चिन्तय । यदि त्वं यथार्थतः कालप्रबन्धने उद्योगी स्याः तर्हि एतद् विषये त्वया तव चेतनस्य तथा अवचेतनस्यापि चित्तस्य प्रयोगः करणीयः । केवलमेतदेव तुभ्यं कालोपयोगस्य नूतनोपायान् ज्ञापयिष्यति यस्य प्रभावेन त्वं भविष्यतिकाले अनायासेन स्वल्पकालमध्ये अधिककर्मसम्पादने समर्थः तथा निपुणोऽपि भविष्यसि ।

**Q5.** अधस्तनगद्यांशस्य संस्कृतभाषानुवादः करणीयः – *20*

We cannot deny the importance of games in life as games make a person sound in body and mind. Society expects of a person to fulfil all his duties, for which it is important for him to keep healthy. He may be very intelligent, but his intelligence is of no use if he is not healthy. In some ways, the human body is like a machine. If it is not made use of, it starts to work badly. People who are not fit grow weak; they become more prone to disease. Any form of game is useful, if it gives the body an opportunity to take regular physical exercise. Playing encourages the spirit of sportsmanship. It enables one to deal with life's problems in a wise and natural manner. The important thing in playing is not the winning or the losing, but the participation. We have to remember some other things about playing games. First, it is the physical exercise that is important for health, not the games themselves, and there are other ways of getting this. Is not India the home of yoga ? When we think of the phrase — a healthy mind in a healthy body — we should not forget that it is the mind which is mentioned first. And if we let games become the most important thing in our lives, then we undermine the importance of the mind.

**Q6.** (a) अधोलिखितानां स्वरचितेषु वाक्येषु प्रयोगः कार्यः – *2×5=10*

(i) एकदा *2*

(ii) केवलम् *2*

(iii) चिरम् *2*

(iv) सहसा *2*

(v) नूनम् *2*



munotes.in

(b) **पदसाधनं क्रियताम् :** *1×10=10*

(i) पथिन् + द्वितीया, बहुवचनम् *1*

(ii) अम्बा + सम्बोधनम्, एकवचनम् *1*

(iii) श्वश्रू + तृतीया, एकवचनम् *1*

(iv) नारी + षष्ठी, द्विवचनम् *1*

(v) दिक् + पञ्चमी, द्विवचनम् *1*

(vi) त्यज् + विधिलिङ्, उत्तमपुरुषे एकवचनम् *1*

(vii) स्पृश् + लृट्, प्रथमपुरुषे एकवचनम् *1*

(viii) दा + लोट्, मध्यमपुरुषे बहुवचनम् *1*

(ix) हन् + लङ, प्रथमपुरुषे द्विवचनम् *1*

(x) वृत् + लट्, उत्तमपुरुषे बहुवचनम् *1*

(c) **समासो विधेयः समासनाम च लेखनीयम् :** *2×5=10*

(i) कण्ठस्य समीपे *2*

(ii) शोक अग्निरेव *2*

(iii) गवे हितम् *2*

(iv) हरिश्च हरश्च *2*

(v) न सुरः *2*

(d) **अधोलिखितानि वाक्यानि शुद्धीकरणानि :** *2×5=10*

(i) हे माता, माम् अन्नं देहि । *2*

(ii) देवदत्तेन कटम् आस्ते । *2*

(iii) विष्णुना स्वाहा । *2*

(iv) मोहनः अक्ष्णात् कानः । *2*

(v) महिषी प्रासादस्य पतति । *2*

munotes.in

munotes.in